# mahAmRityunjaya kavacha

# મહામૃત્યુઞ્જયકવચમ્

## Document Information

Text title : mahAmRityuMjaya kavacha 1

File name : mahaamRikavacha.itx

Category : kavacha, shiva

Location : doc_shiva

Author : Traditional

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rUdrayAmala_tantra

Latest update : January 02, 2005, January 13, 2008

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# મહામૃત્યુઞ્જયકવચમ્

શ્રી ગણેશાય નમઃ ।
ભૈરવ ઉવાચ ।
શ‍ૃણુષ્વ પરમેશાનિ કવચં મન્મુખોદિતમ્ ।
મહામૃત્યુઞ્જયસ્યાસ્ય ન દેયં પરમાદ્ભુતમ્ ॥ ૧॥

યં ધૃત્વા યં પઠિત્વા ચ શ્રુત્વા ચ કવચોત્તમમ્ ।
ત્રૈલોક્યાધિપતિર્ભૂત્વા સુખિતોઽસ્મિ મહેશ્વરિ ॥ ૨॥

તદેવવર્ણયિષ્યામિ તવ પ્રીત્યા વરાનને ।
તથાપિ પરમં તત્ત્વં ન દાતવ્યં દુરાત્મને ॥ ૩॥

વિનિયોગઃ
અસ્ય શ્રીમહામૃત્યુઞ્જયકવચસ્ય શ્રીભૈરવ ઋષિઃ,
ગાયત્રીછન્દઃ, શ્રીમહામૃત્યુઞ્જયો મહારુદ્રો દેવતા,
ૐ બીજં, જૂં શક્તિઃ, સઃ કીલકં, હૌમિતિ તત્ત્વં,
ચતુર્વર્ગસાધને મૃત્યુઞ્જયકવચપાઠે વિનિયોગઃ ॥

ૐ ચન્દ્રમણ્ડલમધ્યસ્થં રુદ્રં ભાલે વિચિન્ત્ય તમ્ ।
તત્રસ્થં ચિન્તયેત્ સાધ્યં મૃત્યું પ્રાપ્નોઽપિ જીવતિ ॥ ૧॥

ૐ જૂં સઃ હૌં શિરઃ પાતુ દેવો મૃત્યુઞ્જયો મમ ।
ૐ શ્રીં શિવો લલાટં મે ૐ હૌં ભ્રુવૌ સદાશિવઃ ॥ ૨॥

નીલકણ્ઠોઽવતાન્નેત્રે કપર્દી મેઽવતાચ્છ્રુતી ।
ત્રિલોચનોઽવતાદ્ ગણ્ડૌ નાસાં મે ત્રિપુરાન્તકઃ ॥ ૩॥

મુખં પીયૂષઘટભૃદોષ્ઠૌ મે કૃત્તિકામ્બરઃ ।
હનું મે હાટકેશનો મુખં બટુકભૈરવઃ ॥ ૪॥

કન્ધરાં કાલમથનો ગલં ગણપ્રિયોઽવતુ ।
સ્કન્ધૌ સ્કન્દપિતા પાતુ હસ્તૌ મે ગિરિશોઽવતુ ॥ ૫॥

નખાન્ મે ગિરિજાનાથઃ પાયાદઙ્ગુલિસંયુતાન્ ।
સ્તનૌ તારાપતિઃ પાતુ વક્ષઃ પશુપતિર્મમ ॥ ૬॥

કુક્ષિં કુબેરવરદઃ પાર્શ્વૌ મે મારશાસનઃ ।
શર્વઃ પાતુ તથા નાભિં શૂલી પૃષ્ઠં મમાવતુ ॥ ૭॥

શિશ્નં મે શઙ્કરઃ પાતુ ગુહ્યં ગુહ્યકવલ્લભઃ ।
કટિં કાલાન્તકઃ પાયાદૂરૂ મેઽન્ધકઘાતકઃ ॥ ૮॥

જાગરૂકોઽવતાજ્જાનૂ જઙ્ઘે મે કાલભૈરવઃ ।
ગુલ્ફૌ પાયાજ્જટાધારી પાદૌ મૃત્યુઞ્જયોઽવતુ ॥ ૯॥

પાદાદિમૂર્ધપર્યન્તમઘોરઃ પાતુ મે સદા ।
શિરસઃ પાદપર્યન્તં સદ્યોજાતો મમાવતુ ॥ ૧૦॥

રક્ષાહીનં નામહીનં વપુઃ પાત્વમૃતેશ્વરઃ ।
પૂર્વે બલવિકરણો દક્ષિણે કાલશાસનઃ ॥ ૧૧॥

પશ્ચિમે પાર્વતીનાથો હ્યુત્તરે માં મનોન્મનઃ ।
ઐશાન્યામીશ્વરઃ પાયાદાગ્નેય્યામગ્નિલોચનઃ ॥ ૧૨॥

નૈરૃત્યાં શમ્ભુરવ્યાન્માં વાયવ્યાં વાયુવાહનઃ ।
ઉર્ધ્વે બલપ્રમથનઃ પાતાલે પરમેશ્વરઃ ॥ ૧૩॥

દશદિક્ષુ સદા પાતુ મહામૃત્યુઞ્જયશ્ચ મામ્ ।
રણે રાજકુલે દ્યૂતે વિષમે પ્રાણસંશયે ॥ ૧૪॥

પાયાદ્ ઓં જૂં મહારુદ્રો દેવદેવો દશાક્ષરઃ ।
પ્રભાતે પાતુ માં બ્રહ્મા મધ્યાહ્ને ભૈરવોઽવતુ ॥ ૧૫॥

સાયં સર્વેશ્વરઃ પાતુ નિશાયાં નિત્યચેતનઃ ।
અર્ધરાત્રે મહાદેવો નિશાન્તે માં મહોમયઃ ॥ ૧૬॥

સર્વદા સર્વતઃ પાતુ ૐ જૂં સઃ હૌં મૃત્યુઞ્જયઃ ।
ઇતીદં કવચં પુણ્યં ત્રિષુ લોકેષુ દુર્લભમ્ ॥ ૧૭॥

ફલશ્રુતિ

સર્વમન્ત્રમયં ગુહ્યં સર્વતન્ત્રેષુ ગોપિતમ્ ।
પુણ્યં પુણ્યપ્રદં દિવ્યં દેવદેવાધિદૈવતમ્ ॥ ૧૮॥

ય ઇદં ચ પઠેન્મન્ત્રી કવચં વાર્ચયેત્ તતઃ ।
તસ્ય હસ્તે મહાદેવિ ત્ર્યમ્બકસ્યાષ્ટ સિદ્ધયઃ ॥ ૧૯॥

રણે ધૃત્વા ચરેદ્યુદ્ધં હત્વા શત્રૂઞ્જયં લભેત્ ।
જયં કૃત્વા ગૃહં દેવિ સમ્પ્રાપ્સ્યતિ સુખી પુનઃ ॥ ૨૦॥

મહાભયે મહારોગે મહામારીભયે તથા ।
દુર્ભિક્ષે શત્રુસંહારે પઠેત્ કવચમાદરાત્ ॥ ૨૧॥

સર્વં તત્ પ્રશમં યાતિ મૃત્યુઞ્જયપ્રસાદતઃ ।
ધનં પુત્રાન્ સુખં લક્ષ્મીમારોગ્યં સર્વસમ્પદઃ ॥ ૨૨॥

પ્રાપ્નોતિ સાધકઃ સદ્યો દેવિ સત્યં ન સંશયઃ
ઇતીદં કવચં પુણ્યં મહામૃત્યુઞ્જયસ્ય તુ ।
ગોપ્યં સિદ્ધિપ્રદં ગુહ્યં ગોપનીયં સ્વયોનિવત્ ॥ ૨૩॥

। ઇતિ શ્રીરુદ્રયામલે તન્ત્રે શ્રીદેવીરહસ્યે
મૃત્યુઞ્જયકવચં સમ્પૂર્ણમ્ ।

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

*mahAmRityunjaya kavacha*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*